कृष्णाश्रयस्तोत्रम्

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

कृष्णाश्रयस्तोत्रम् ।

श्रीमद्व्रजराजचरणविरचितविवरणविभूषितम् ।

यद्वाक्यमात्रकथनात् स्वीयत्वं मनुते हरिः ।
ते कृष्णवल्लभाचार्याः प्रसीदन्तु सदा मयि ।।१।।
तदनुग्रहतः कृष्णाश्रयस्य विवृतिर्मया ।
विधीयते यतः कृष्णाश्रयः फलति सर्वथा ।।२।।

अथ श्रीमदाचार्यचरण भगवदाज्ञानुसारेण जनानुद्धर्तु निबन्धादौ सपरिकरं भक्त्यादिमार्गानुपदिश्य प्रत्यहं कलेराधिक्येन तेषां दुःसाध्यत्वमाकलय्य विवेकधैर्याश्रयग्रन्थे विवेकधैर्याभ्यां सहितमाश्रयमुपदिष्टवन्तः, तत्स्वरूपं च तत्र सर्वथा सर्वदा भगवच्छरणगमनात्मकं सिद्धं, तथा च तत् कायिकादिभेदेन त्रिधा भवति, तत्र प्रथमं मानसं शरणं भावनात्मकं भवति, पश्चात् कायिकं तद्धैर्येण सिद्ध्यति, वाचनिकं तु ‘‘प्रपन्नं पाहि मां प्रभो’’इत्यादिप्रार्थनारूपम्. एतादृशस्य भवनेपि कारणं भगवदनुग्रह एवेति ‘‘सोहं तवाङ्घ्री’’त्यक्रूरस्तुतौ ‘‘असतां दुरापं तच्चाप्यहं भवदनुग्रहमीश मन्य’’इति स्वानुभवेन प्रतिपादितम्. शरणागतिलक्षणं च तत्रैवोक्तं ‘‘यदि सङ्घातमनुगुणं कुर्यात् त्याजयेद्वा तदा शरणागतिः सिद्धेति ज्ञातव्य’’मित्यारभ्य ‘‘सत्सेवारुचिर्भगवत्स्वरूपज्ञानेच्छा भगवच्छास्त्रपरत्वं चान्तिमजन्मज्ञापक’’मित्यन्तेन. ‘‘अनुगुणपक्षस्तु सुगम’’ इति च. एवं सत्येतादृशी शरणागतिर्विवेकधैर्याश्रयोक्तरीत्यापि साम्प्रतं कठिनेति भक्त्यादिमार्गाणां दुःसाध्यत्वे हेतुरपि तत्र नोक्त इति निबन्धादावुक्तोपि दुर्ज्ञेय इति तदुक्तिपूर्वकं साङ्गां वाचनिकीं तां साम्प्रतं साधनत्वेन विवक्षन्तः कृष्णाश्रयस्तोत्ररूपेणाहुः सर्वत्यादि.

अत्र टीकारम्भे श्रीरघुनाथचरणैर्ग्रन्थावतरणिका कापि नोक्ता परन्तु ‘‘य आविरासीद्धोरेस्मिन् कलौ श्रीवल्लभाभिधः. निजदास्यं स नो देयादव्यादपि दुराश्रयादि’’तिमङ्गलवाक्ये कलिस्वरूपस्य श्रीमदाचार्येषु प्रार्थनस्य च कथनेन सूचितेति न विरोधः. एवं कल्याणरायैरपि कृष्णाश्रयस्य सर्वसाधकत्वं सर्वसाधनानामसाधकत्वं चोक्तमिति तेषामप्ययमेवाशयः. श्लोकसङ्ख्यातात्पर्यं तैरेवमुक्तं ‘‘भक्तानां भगवानेव देशादिषट्साधनरूपश्चतुर्विधपुमर्थरूपश्चेति, दशलीलानिरूप्य इति, दशविधभक्तसेव्य इति’’, स्तोत्रार्थरूपे भगवति दशविधाः ‘‘दश वै पशुषु प्राणा’’इतिश्रुतेः प्राणानां दशत्वं, ते यथा साधकास्तथा स्तोत्रमपीति शब्देपि दशविधाः. अतोऽर्थमनुकूलयन् शब्द एवायं साधक इतिबोधनाय प्रार्थनाव्याजेन स्तुवन्तीति. द्वारिकेश्वरैस्तु

‘‘आभासश्च निरोधश्चे’’ति वाक्यलिखनेन ‘‘नच लक्षणलक्षितया यजमानपञ्चमा इडां भक्षयन्ती’’तिवदत्र दशसङ्ख्यापूरकसर्वफलरूपोत्र विवक्षित इत्याशय उद्घाटित:. तथा च ‘‘या–या साधनसम्पत्ति: पुरुषार्थचतुष्टये. तया विना तदाप्नोति नरो नारायणाश्रय’’ इतिवाक्यलिखनेनाश्रयशब्द: कृष्णाश्रय इति स्तोत्रनामेति तेषामाशय:. मम त्वन्यदपि प्रतिभाति:यथाक्रूरेण प्रसन्नप्रत्यक्षो भगवान् स्वाधिकारानुसारेण शरणतया प्रार्थितस्तथाऽऽचार्यैरपि स्वप्रकटितभक्तिमार्गफलदानानुकूल: प्रसन्न: स्वोक्तिपठनमात्रेणाश्रयदानं कर्तुं समयविशेषे प्रार्थितस्तर्दो कृतवानिति तज्ज्ञापकमिदं प्रार्थनाघटितं स्तोत्रमिति. अत्र च भगवान् गतित्वेन प्रार्थ्यते अस्त्विति क्रियाध्याहारेण. तत्र गतिशब्द: फले रूढ:, ‘‘सा काष्ठा सा परा गति:’’ ‘‘अन्ते या मति: सा गति:’’ ‘‘नान्या भवेद्गतिरिन्दमे’’ति श्रुतिपुराणादौ तथाप्रसिद्धै:. समाप्तौ तु ‘‘तस्याश्रयो भवेत्कृष्ण’’ इत्याश्रयत्वं पाठफलत्वेनोक्तम्. आश्रयशब्दश्च सहाये रूढ:, ‘‘सिद्धाखिलार्था मधुसूदनाश्रया:’’ ‘‘भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयै’’रित्यादौ तथाप्रसिद्धे:. कृष्णशब्दश्च परब्रह्मवाचक: ‘‘कृषिर्भूवाचक: शब्दो णश्च निवृत्तिवाचक:. तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते’’इतितापनीयश्रुते:, ‘‘पापकर्षणो ह वे’’ति च. ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे श्रीरुक्मिण्युद्वाहोत्तरं श्रीयशोदां प्रति भगवद्वाक्येपि ‘‘कृषिरुत्कृष्टवचनो णश्च सद्भक्तिवाचक:. अश्चापि दातृवचनस्तेन कृष्णं विदुर्बुधा:’’ ‘‘कृषिश्च परमानन्दे णश्च तद्दास्यकर्मणि. तयोर्दाता च यो देवस्तेन कृष्ण: प्रकीर्तित:’’ ‘‘कोटिजन्मार्जिते पापे कृषि: क्लेशे च वर्तते. भक्तानां णश्च निर्वाणे तेन कृष्ण: प्रकीर्तित:’’ इति त्रिधा निरुक्त:. तत्र तृतीयेन ‘पापकर्षण’ इतितापनीयश्रुतिरूपबृंहिता. गौतमीयतन्त्रे अष्टादशार्णव्याख्यायां च ‘‘कृषिशब्दश्च सत्तार्थो णश्चानन्दस्वरूपक:. सुखरूपो भवेदात्मा भावानन्दमयत्वत’’इति. बृहद्गौतमीयेपि ‘‘कृषशब्दो हि सत्तार्थो णश्चानन्दस्वरूपक:. सत्तास्वानन्दयोर्योगाच्चित्परं ब्रह्म चोच्यते’’ इत्येताभ्यां पूर्वश्रुतिरूपबृंहिता. अत्र प्रथमे सर्वशब्दप्रवृत्तिनिमित्तभूता सत्ता भावपदेनात्मपदेन च व्याख्याता ‘‘रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम्. सत्तामात्रमि’’तिदशमस्कन्धवाक्येन भगवत्स्वरूपं तेन सम्बन्धिदानात्सत्तैव भिद्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिता:, तां ‘‘प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते सा जाति: सा महानात्मा तामाहुस्त्वतलादय’’इति वाक्यपदीयोक्तरीत्या मूलसद्रूपाभिन्नानन्दरूपत्वेन कृषणत्वं विवृतं, द्वितीये च प्रत्याहारन्यायेन सदानन्दयोरन्तश्चित्तं निवेश्य सच्चिदानन्दतया परब्रह्मत्वेन कृष्णत्वं विवृतमितिभेदा:. अन्या अपि निरुक्तयो ब्रह्मवैवर्ते नामकरणप्रसङ्गे गर्गेणोक्ता: पञ्च सन्ति तास्ततो ज्ञातव्या:. आनन्दे च निरवधित्वमेव परमफलतावच्छेदकमित्यानन्दमयाधिकरणे स्थितम्. ‘‘यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य’’ इति छन्दोगश्रुते‘‘र्यतो वाचो निवर्तन्ते’’इतितैत्तिरीयश्रुतेश्च. फलं द्विविधं, साध्यमभिव्यङ्ग्यं च. तत्राद्यं यथा परशोश्छिदा. द्वितीयं तथा योगात्मसुखम्. तत्र परे ब्रह्मण्याद्यरूपत्वस्याभावाद्द्वितीयरूपतैव वाच्या. तत्र हेत्वपेक्षायां ‘‘यमेवैप

वृणुते तेन लभ्य’’ इतिश्रुत्या स्वीयत्वेन वरणे यत्साक्षाद्दर्शनं तदेव हेतु:. तथा सति ‘‘नायमात्मा प्रवचनेन’’त्यादिपूर्वोद्धे उपलक्षणविधया साधनान्तरनिषेधश्रावणेन वरणद्वारकं स्वस्यैव साधनत्वमुक्तं भवति. तदेव च ब्रह्मावैवर्तोपबृंहणेष्वपि सिद्धम्. तदेतत् सर्वं हृदि कृत्वा मूढानां सन्देहनिवारणायादृष्टशास्त्रेऽनुरुद्ध्यमार्गाणां कालादीनां सन्निपत्याराच्चोपकारकाणामसाधकत्वं दोषांश्च वदन्त उक्तरीत्या स्वस्मिन् फलरूपत्वमतिरोभावयित्वा तत्र साधनरूपोस्त्विति प्रार्थयन्ति:

सर्वमार्गेषु नष्टेषु कलौ च खलधर्मणि ।
पाषण्डप्रचुरे लोके कृष्ण एव गतिर्मम ।।१।।

सर्वे च ते मार्गाश्च. ‘‘मृजूष् शुद्धौ’’ मृज्यन्ते शोध्यन्त इति. ‘‘मृग अन्वेषणे’’ मृग्यन्ते तत्तत्फलार्थिभिरन्विष्यन्त इति मृगा:, स्वार्थेण् त एव मार्गा: ‘‘योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया. ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कश्चने’’त्येकादशे भगवतोक्ता: स्वप्राप्त्युपाया: तेषु नष्टेषु अनुशास्तृदौर्लभ्यादिना तिरोहितेषु कृष्णो व्याख्यातरीतिको भगवानेव मम गति:साधनफलरूपोस्त्विति सम्बन्ध:. अत्र ‘‘यस्य च भावेन भावलक्षणमि’’त्यनेन भावलक्षणा सप्तमी. अनुशास्तदौर्लभ्यादौ हेतु: स्वलधर्मणि कलौ लोके पाषण्डप्रचुरे सतीति. चोवधारणे. खलोन्तर्दुष्टो धर्मो यस्मिन्नसौ खलधर्मा ‘‘धर्मादनिच् केवलादि’’ त्यनेनानिच्. खलधर्मत्वे हेतुर्लोकानां पाषण्डप्राचुर्यम्. पाषण्ड उपधर्मो जैनदयादिसदृशस्तस्य प्राचुर्यं बाहुल्यम्. कलावित्यधिकरणे सप्तमी. आधारत्वं चात्राभिव्यापकतया कालिकसम्बन्धेन गौणौपश्लोषिकतया वा. तथाचैतादृशे कलावीदृशे लोके सर्वमार्गेषु नष्टेषु सत्सु तथेत्यर्थ:. ‘‘षष्ठी चानादरे’’ इत्यनेनानादरे वा कलाविति सप्तमी. हेतु–हेतुमद्भावस्तु समभिव्याहारादेव लभ्य:. तथाचैतादृशे लोके एवम्यार्गेषु सत्सु कलिमनादृत्य तद्भयं त्यक्त्वा तथेत्यर्थ:. ‘‘कलेर्दोषनिधे राजन्’’ ‘‘कलिं सभाजयक्त्यार्या’’ इत्यादिवाक्येषु कलिस्तुतेस्तत्र साधकत्वभ्रमवारणाय कीर्तनस्यापि यथाकथञ्चित्कृतस्य न फलसाधकत्वमितिबोधनाय चात्र कलिलोकयोर्दोषकथनम्. ‘कृष्ण’पदा‘त्सं’पदाच्च नैतद्वाक्यविरोध इति बोध्यम्. तथाच जलभेदोक्तरीत्या कीर्तियितृन्निश्चित्य भगवानाश्रयणीय इति भाव:. यद्वा, तादृशे लोके मार्गेषु नष्टेषु ‘‘वादवादांस्त्यजेत्तर्कान् पक्षं कञ्च न संश्रयेदि’’तिसप्तमस्कन्धीयनारद वाक्यानुसन्धानेन विवक्षितमार्गस्यैव दृढग्रहणात् कलौ तत्तन्मार्गाणां साधकत्वतरतमभावादिकलहे नष्टे. चकारोत्र तन्नाशसमुच्चायक:. तथा सति तथेत्यर्थ:. एवमपि बोध्यम्, प्रथमव्याख्यानरीतौ कलौ सर्वमार्गेषु नष्टेष्वितिपदानां, कलावित्यस्यैव वाग्रिमश्लोकपञ्चकेनुषङ्गो बोध्य:. एवद्रीत्या व्याकुर्वन्त: प्राञ्च: सर्वेपि विशेष्यान्वितस्यैवकारस्यान्ययोगव्यवच्छेदकतयांशकलावतारव्यवच्छेदं तेनाहु:, तदस्माकमप्यभिप्रेतम्. श्रीरघुनाथास्तु ‘खरधर्मिणी’ति पाठान्तरमप्युपन्यस्य खरश्चासौ धर्मश्चेति कर्मधारयान्मत्वर्थीयेन्प्रत्ययं बहुव्रीहिविग्रहे ‘क’प्रत्ययापतिभिमाहु:, चकारं च कलिव्यतिरिक्तकालसमुच्चायकमाहु:, मायातरणे

प्रपत्त्यतिरिक्तसाधनाभावस्य सर्वकालेषु तौल्यादिति तेषामाशयः. प्रार्थना तु सर्वमतेप्यन्यार्था ।।१ ।।

एवं कालदोषेण सङ्गदोषं मार्गनाशं चोपपाद्य कालस्य साधारणत्वेन देशानामसाधारणत्वेन पदपेक्षयान्तरङ्गत्वात्तत्र च ‘‘काश्यादिपुर्यो यदि सन्ति लोके तासां तु मध्ये मथुरैव धन्या. या जन्ममौञ्जीव्रतमृत्युदाहैर्नृणां चतुर्धा विदधाति मुक्तिपि’’त्यादिभिर्देशस्तावकवाक्यैः साक्षात्साधकत्वस्य ‘‘देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितानि’’ त्यादिभिर्वाक्यैर्मार्गानुकूलतायाश्च प्रतीतेः प्राप्तं तथात्वभ्रमं वारयितुं कालेत देशदोषादिकं वदन्त आहुः म्लेच्छेत्यादि.

म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च ।
सत्पीडाव्यग्रलोकेषु कृष्ण एव गतिर्मम ।।२ ।।

अत्रापि भावलक्षणा सप्तमी. चोवधारणे. कलावित्यनुपज्यते. देशेषु म्लेच्छैयवनैः उपलक्षणमेतत् अतितामसैरिति यावत्, **तैराक्रान्तेषु** व्याप्तेषु. व्याप्तिरत्र तदाज्ञाद्यनुरूपस्थितिकत्वम्. तदाज्ञानुरूपस्थितौ को दोष इत्यत आहुः पापेत्यादि. ‘‘एके मुख्यान्यकेवलाः’’तत्पुरुषगर्भः कर्मधारयः. **पापानां** व्यभिचारचौर्यदौर्जन्यादीनामेकनिलयेषु मुख्यस्थानेषु. ते हि लुब्धाः कामिनो हिंस्राश्च, ततस्तत्र व्यभिचारादिकं कुर्वन्ति चौर्यादिकं कारयन्ति च. तदवलोकलोका अपि पैशुन्यशाम्भल्यादिना तथा विदधतीत्येष दोष इत्यर्थः. ननु न सर्वे तादृशा इति नैष दोष इत्यतो दोषान्तरमाहुः सत्पीडेत्यादि. सतां स्वधर्मवर्तिनां पीडया मिथ्याभिशापदण्डादिरूपक्लेशेन व्यग्रा उद्विग्रा लोकाः सम्यञ्चो जना येष्विति. एवं च कलिकृतास्तेषु चत्वारो दोषा उक्ताः. तामसप्रभुकत्वम्, पापबाहुल्यम्, सत्पीडा, सदुद्वेगश्चेन्येतैरुपद्रवेण सम्यकर्तुमशक्त्या सर्वमार्गेषु नष्टेषु सत्सु कृष्ण एवेति पूर्ववत् ।।२ ।।

एवं कालेन देशदोषादिकमुपपाद्य तेषां बाह्यत्वेन जलस्य चान्तःप्रवेशवहिः सम्बन्धाभ्यां शोधकतया देशापेक्षयाप्यन्तरङ्गत्वात्तत्र च ‘‘सद्यः पुनाति गाङ्गेयं दर्शनादेव नार्मदम्’’ ‘‘कावेरी च महापुण्या प्रतीची च महानदी. ये पिबन्ति जलं तासां मनुजा मनुजेश्वर’’ ‘‘प्रायो भक्ता भगवति वासुदेवेमलाशयाः’’ इत्यादिवाक्यैः साधकत्वमार्गानुकूलत्वप्रतीतेस्तेषु तथात्वभ्रमं वारयितुं कालेन तत्रापि दोषं वदन्त आहुः गङ्गादितीर्थवर्येष्विति.

गङ्गादितीर्थवर्येषु दुष्टैरेवावृतेष्विह ।
तिरोहिताधिदैवेषु कृष्ण एव गतिर्मम ।।३ ।।

इह भारतवर्षे गङ्गादीनि यानि तीर्थश्रेष्ठानि तेषु दुष्टैः कर्मणा भावभेदेन च ये दूषितास्तैरेव वेष्टितेषु. अत्रापि भावलक्षणैव सप्तमी. तथाच ‘‘किञ्चाहं न भुवं यास्ये नरा मय्यामृजक्त्यधम्. मृजामि तदघं कुत्र राजंस्तत्र विचिक्त्यतामि’’तिनवमस्कन्धे भगीरथं प्रति गङ्गावाक्याद्दुष्टावरणेन तेष्वपि

शक्तिकौण्ठ्यदोष इत्यर्थः. ननु ‘‘साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः. हरक्त्यद्यं तेङ्गसङ्गात्तेष्वास्ते ह्यधभिद्धरिरि’’ति तत्रैव गङ्गां प्रति भगीरथवाक्यात्तादृशां सङ्गादिना तन्निवृत्तेस्तस्य प्रायिकत्वान्नायं दोष इत्यत आहुः तिरोहिताधिदैवेष्विति. देवानां समूहो दैवम्, दैवे इत्यधिदैवं, देवसमूहे विद्यमानं गङ्गादेर्देवतारूपम्, तिरोहितं अधिदैवं यस्मिंस्ततिरोहिताधिदैवम्. तथाच देवसंसदि विद्यमानं यद्गङ्गादेराधिदैविकं रूपं तत्तिरोधानाच्छक्तिकौष्ठ्यतादवस्थ्यमित्यर्थः. यद्वा, तिरोहित आधिर्यस्य तत्तिरोहिताधि, तादृशं दैवं देवसमूहो येष्विति. ‘‘तत्तेषां न प्रियं यन्मनुष्या विद्युरि’’ति ‘‘विप्रस्य वै सक्क्यसतो देवा दारादिरूपिणः. विघ्नं कुर्वक्त्ययं ह्यस्मानाक्रम्य समियात्परमि’’ति श्रुतिस्मृत्युक्तदिशा मनुष्यमुक्तिस्तेषां न प्रियेति तन्निवृत्त्यर्थं वाराहपाद्मादौ मुक्त्यभावाय भगवत्प्रार्थनावदत्र तीर्थादौ दुष्टेष्वाविश्य प्रतिबन्धन्तस्तिरोहिताधयो भवक्त्यतः शक्तिसद्भावेषि दोषतादवस्थ्यमतः कृष्ण एवेति पूर्ववदित्यर्थः. एतेन ‘‘तीर्थादावपि या मुक्तिः कदाचित्कस्यचिद् भवेत्. कृष्णप्रसादयुक्तस्य नान्यस्येति विनिश्चय’’ इतिनिबन्धोक्तौ युक्तिरपि प्रत्यक्षादिरूपा दर्शिता ।।३ ।।

अतः परं ‘‘न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः. ते पुनक्त्युरुकालेन दर्शनादेव साधव’’ इति वाक्यात्तदपेक्षयान्तरङ्गत्वेन तेषां च सङ्गस्य ‘‘प्रसङ्गमजरं पाशमात्मनः कवयो विदुः. स एव साधुषु कृतो मोक्षद्वारमपावृतम्’’ ‘‘सतां प्रसङ्गात्’’ ‘‘सन्त एतस्य छिन्दन्ति’’ ‘‘सत्सङ्गेन हि दैतेया’’ इत्यादिवाक्यैः साधकत्वमार्गानुकूलत्वप्रतीतेस्तत्र तथात्वभ्रमं वारयितुं कालकृतं सत्सु दोषं वदन्त आहुः अहमारेत्यादि.

अहमारविमूढेषु सत्सु पापानुवर्तिषु ।
लाभपूजार्थयत्नेषु कृष्ण एव गतिर्मम ।।४ ।।

अत्रा‘‘र्हाणां कर्तृत्व’’इत्यनेन तद्वैपरीत्ये सप्तमी. **कलौ सत्सु मार्गप्रचारकेषु** पुरुषेष्वहमारेण स्वपाण्डित्याभिमानेन **विशेषतो मूढेषु सत्सु**. तथात्वे गमवद्वयमाहुः **पापे**त्यादि. **पापाः** पापकर्तारो राजसास्तामसाश्च म्लेच्छादयस्तदनुवर्तिषु तदुपजीविकेषु. अक्रूरादेः कंसाद्यनुवृत्तिवदनुवर्तित्वेष्यदोष इति तव्द्यावृत्त्यर्थं विशेषणान्तरं लाभेत्यादि. लाभो द्रव्यादेः, पूजा उन्नतिः, अर्थशब्दो द्वन्द्वान्ते श्रुतः प्रत्येकं सम्बध्यते, तेन तदर्थं यत्नोबाह्याभ्यन्तर उद्यमो येषामिति. एतद्द्वयं विमूढत्वज्ञापकम्. तथाच मार्गप्रचारकेष्वेतादृशेषु जातेषु सतामभावात्सङ्गो दुरापास्त इति सर्वमार्गेषु नष्टेषु कृष्ण एवेति पूर्ववत् ।।४ ।।

अतः परं सतां दुर्मिलतया तदपेक्षया मन्त्रसाधनजपादेः स्वमात्रसाध्यतयान्तरङ्गत्वातत्र च ‘‘परिहाय्यापि वेदांस्त्रीन् कर्माणि विहितानि च. गायत्रीमात्रमाश्रित्य द्विजो भवति निर्भयः’’ ‘‘गायत्रीहीनवेदास्तु साङ्गा अपि च निष्फलाः’’ ‘‘सर्वेषु वर्णेषु तथाश्रमेषु नारीषु नानाद्वयजन्मभेषु. दाता फलानामभिवाञ्छितानां द्रागेव गोपालकमन्त्र एष’’ इत्यादिवाक्यैस्तत्तन्मन्त्राणां

तथात्वप्रतीतेस्तेषु तथात्वभ्रमं वारयितुं तत्रापि कालेन दोषं वदन्तु आहुः अपरीत्यादि.

अपरिज्ञाननष्टेषु मन्त्रेष्वव्रतयोगिषु ।
तिरोहितार्थदेवेषु कृष्ण एव गतिर्मम ।।५।।

अपरिज्ञाननष्टेष्विति. अत्रापि पूर्ववदनुषङ्गो भावलक्षणा सप्तमी च. ‘‘मन्त्रस्य च परिज्ञानमि’’त्येकादशे भगवद्वाक्यात्परिज्ञानेन मन्त्रशुद्धिः. परिज्ञानं नाम गुरुपसत्त्वादिना विधानन्यासपाठार्थतात्पर्यविनियोगादीनां निर्धारस्तदभावोऽपरिज्ञानं, तेन नष्टेषु. स्वरूपस्य श्रावणत्वेपि शुद्ध्यभावेन ‘‘उत त्वः पश्यन्न ददर्श वाचमि’’तिवददृश्यमानेषु. क्वचित्कस्यचित्परिज्ञानदर्शनाद्दोषान्तरमाहुः अव्रतयोगिष्विति. ‘‘अव्रता बटवोऽशौचा’’ इतिद्वादशस्कन्धे कलिधर्मैयुक्तेर्मन्त्रोपाकरणदशायामेव गुरुकुलावासब्रह्मचर्याध्ययनधर्मपरिपालनाभावादव्रतेषु योगः सम्बन्धो येषां तादृशेषु. तेन दोषान्तरमप्याहुः तिरोहितार्थदेवेष्विति. तिरोहितावप्रतीयमानौ अर्थः प्रयोजनं तात्पर्यं च देवोधिष्ठात्री देवता तौ येषाम्. ‘‘य एनं शुष्के स्याणौ निपिश्चेज्जायेरञ्चछाखाः प्ररोहेषुः पलाशानी’’त्यादिश्रुतिप्रभृत्युक्तनिदर्शनव्यभिचारेण तदुभयतिरोभावस्य स्फुटत्वान्न तेषामिदानीं सादकत्वं न वा मार्गानुकूलत्वमतः कृष्ण एवेति पूर्ववत् ।।५।।

अतः परं मन्त्रापेक्षयापि स्वधर्माणां व्रतानामाचारस्य च पूर्वोक्तदोषाभावेन सुकरत्वेन चान्तरङ्गत्वात्तत्र च ‘‘स्वधर्मस्थो यजन्यज्ञैरन्नाशीः काम उद्धव. न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्’’ ‘‘इह लोके वर्तमानः स्वधर्मस्थोनधः शुचिः. ज्ञानं विशुद्धभाप्नोति मद्भक्तिं च यदृच्छये’’त्येकादशस्कन्धीयैः’’ ‘‘केदारे उदकं पीत्वा पुनर्जन्म न विद्यते’’ ‘‘तथा चैकादशी ह्येका गर्भवासक्षयमरी. एकादशीसमं पुण्यं न भूतं न भविष्यती’’त्यादिभिः पुराणान्तरीयैर्भगवद्वाक्यैः आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युत’’ इत्यादिभिर्भारतीयैश्च वाक्यैर्धर्मव्रतादीनां साधकत्वादिप्रतीतेस्तेषु तथात्वभ्रमं वारयितुं तेष्वपि कालेन दोषं वदन्त आहुः नानेत्यादि.

नानावादविनष्टेषु सर्वकर्मव्रतादिषु ।
पाषण्डैकप्रयत्नेषु कृष्ण एव गतिर्मम ।।६।।

नानाप्रकारका ये वादाः स्वरूपफलादिविषयकास्तैर्विशेषेण स्वरूपेण फलदिना च नष्टेषु तिरोहितेषु. तत्र स्वरूपतो नाशो वेदबाह्यानां वादात्. ‘‘यावज्जीवेत्सुखं जीवेत्’’ ‘‘अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकम्. प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका’’ इत्यादिरूपात्. फलतो नाशस्तु यथैकादशीव्रतादौ ‘‘शुक्रेण मोहिता विप्रा दैत्यानां कारणे भुवि. तुष्ट्यर्थं दशमीविद्धं कुर्वन्ति मम वासरमि’’ति प्राङ्मे ‘‘पुरा देवैर्ऋषिगणैः स्वपदच्युतिशङ्क्या. सप्तमीवेधजालेन गोपितं चाष्टमीव्रत’’मिति स्कान्देऽन्यत्र च निषेधनिन्दादेर्वैधस्वरूपनिर्णयस्य च विद्यमानत्वेपि तदनादृत्य स्वस्वाग्रहेण वाक्याभासान्न्यायाभासांश्च समुदाहृत्य निर्णयन्ति, तादृशस्थले बोध्यः. एवं स्वधर्मचारयोरपि विप्रतिपत्त्वा फलतो नाशो बोध्यः. वादे प्रयोजकमाहुः पाषण्डेति. पाषण्डेन दम्भेन एकोन्यःप्रयत्न उद्यमो थेषामिति. स च ‘‘वेश्यावेश्मसु सीधुगन्विललनावक्त्रासवामोदितैर्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्रक्षपाः. सर्वज्ञा इति दीक्षिता इति चिरात्प्राप्ताग्निहोत्रा इति ब्रह्मज्ञा इति तापसा इति दिवा धूतैर्ज्जगद्वञ्च्यते’’ इतिवद्बोध्यः. अत एवं भूयोदर्शनात्स्वधर्मव्रतादीनामपि न स्वतः साधकत्वं न वा मार्गानुकूलत्वमतः कृष्ण एवेति पूर्ववत् ।।६।।

एवं षड्भिर्भक्त्यादिभागार्णां दुःसाध्यताज्ञपनाय कालकृतसर्वसन्मार्गनाशबोधनमुखेनाश्रयणस्योपायत्वं साधितम्, तदिदं तदा दृढीभवति यदा भगवानाश्रिते स्वमाहात्म्यमनुभावयति तदर्थमाहुः **अजामिलादीति**.

अजामिलादिदोषाणां नाशकोऽनुभवे स्थितः ।
ज्ञापिताखिलमाहात्म्यः कृष्ण एव गतिर्मम ।।७।।

अजाभिलादीति. अजामिलः षष्ठस्कन्धे प्रसिद्धो दासीपतिर्ब्रह्मबन्धुः. आदिपदेन गजेन्द्राहल्याद्या, नृसिंहपुराणे नवमाध्याये मार्कण्डेयमृत्युप्रसङ्गे उक्ता नारकिणश्च, तेषां ये दोषा इहजन्मनि पूर्वजन्मनि च कृतानि पापानि तेषां नाशकः. एतेन तादृशमाहात्म्ये तदनुभावने च शब्दः प्रमाणमुक्तम्. प्रत्यक्षमाहुः अनुभव इत्यादि. अनुभवेऽस्माकं स्थितो विषयीभूतो ज्ञापितसमग्रमाहात्म्यः, एतेन प्रपन्नस्य मायातरणे सति प्रतिबन्धकाभावात्स्वयमेवाग्रे माहात्म्यं गोचरीभवतीति ज्ञापितम्. ततश्च पूर्वमार्षे शब्दे श्रीमदाचार्यचरणोक्तौ वोभयत्र वा विश्वस्य भगवदाश्रयणे भगवानेव साधनान्तरापेक्षां विना सर्वं ज्ञापयंस्तद्गोचरो भवतीति सूचितम्. कृष्ण एवेति पूर्ववत् ।।७।।

एवमत्र शब्दप्रत्यक्षाभ्यां पूर्वोक्तश्रुतिब्रह्मवैवर्तादिरीत्या भगवानेव पुष्टिमार्गीयाणां साधनमिति साधितमतः परं पूर्वोक्तश्रुतिगौतमीयतन्त्रोक्तरीतिकं भगवतः फलत्वं साधयन्ति प्राक्रता इत्यादि.

प्राकृताः सकला देवा गणितानन्दकं बृहत् ।
पूर्णानन्दो हरिस्तस्मात् कृष्ण एव गतिर्मम ।।८।।

देवा अष्टौ वसव, एकादश रुद्रा, द्वादशादित्या, इन्द्रः, प्रजापतिश्चेति त्रयस्त्रिशत्वा, ‘‘अग्निरवमो देवानां विष्णुः परमस्तदन्तरेणान्या देवता’’इत्याग्क्यादयो विष्ण्वन्ताः. अत्र विष्णुः कालः, ‘‘स विष्णवाख्योधियज्ञोसौ कालः कलयतां वर’’ इतिवाक्यातदन्ता वा. अकारं ब्रह्माणं नाभावुकारं विष्णुं हृदये प्रकारं रुद्रं भ्रूमध्य इति प्रणवपात्राधिष्ठातारो विश्वादयो वा प्रजापत्यन्ताः, शतानन्दिनो वा. ते सकलाः कला अंशस्तत्सहिताः, सर्वे प्राकृताः, प्रकृतिर्माया ‘‘मायां तु प्रकृतिं विद्यादि’’तिश्रुतेस्तदधीनाः. कालस्य क्षोभकतया गुणानुरोदित्वेन गुणाधिष्ठातृणामभियानित्वेन च प्राकृतत्वम्. बृहदक्षरं गणितानन्दकं, गणितः ‘‘स एको मानुष आनन्द’’ इत्यारभ्य शतानन्दिनां गणने ‘‘स एको ब्रह्मण आनन्द’’ इत्युत्तरावधौ ब्रह्म गणितम्, अत एवंसङ्ख्यात आनन्दो यत्र, स्वार्थे कस्तादृशम्.

तेन तुरीयकोटिनिविष्टा ओंकारं सर्वेश्वरं द्वादशान्त इत्याद्युक्ता गुणावतारा अपि तत्रैव प्रविशन्तीतिबोधितम्. हरिः पुरुषोत्तमोऽ‘‘क्षरात्परतः परः’’ स उत्तमः पुरुषः. ‘‘अतोऽस्मि लोके वेदे च प्रथितः परुषोत्तम’’ इत्यादिश्रुतिस्मृतिप्रतिपाद्यः. पूर्णानन्दः शतानन्दसङ्ख्याने ब्रह्मानन्दस्य सर्वपरत्वेन गणनया मानेवाग्गोचरतामेव प्रतिपाद्य तदुत्तरानुवाके ‘‘यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह. आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चने’’तीतिश्रुतावानन्दस्य मनोवागगोचरत्वकथनेन तदपेक्षयाधिक्यस्यानवधित्वस्य च बोधनात्तथा. तस्मादानन्दे निरवधित्वस्यैव परमफलतावच्छदकत्वेन तस्य चात्रैव विश्रान्तेः कृष्णः पूर्वोक्तरीतिकः मम परमफलरूपोस्त्विति पूर्ववत् ।।८।।

एवमष्टभिर्भगवत्स्वरूपविचारेणाश्रय एव सर्वथा साधको न त्वन्यः कोपि मार्गः साधक इति साधितम्. अतः परमाश्रयस्यापि साङ्गस्यैव साधकता विवेकधैर्याश्रये सिद्धेति तदङ्गाभावेऽपि यथा स फलं साधयति तमुपायं वदन्त आहुः विवेकेत्यादि.

विवेकधैर्यभक्त्यादिरहितस्य विशेषतः ।
पापासक्तस्य दीनस्य कृष्ण एव गतिर्मम ।।९।।

सर्वदुःखहर्ता भगवान् स्वेच्छातः सर्वं करिष्यतीत्येतद्विचारपूर्वकमनुसधानं विवेकः. सात्त्विकादीनां कायिकादीनां भौतिकादीनां त्रिविधदुःखानां प्रतीकारानाचरणेनोपेक्षणं धैर्यम्. माहात्म्यज्ञानपूर्वकः सुदृढः स्नेहो भक्तिर्नवविधा च. आदिपदेन तदङ्गानि. साङ्गे ज्ञानकर्मणी च. तै रहितस्यैतेन यावत्साधनराहित्यं सूचितम्. बाधकसत्तामाहुः विशेषतः पापासक्तस्येति. आसक्तिः सङ्गतिशयोपरिहार्यःसङ्ग इति यावत्. एतावता नाराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत’’ इतिवाक्यस्मारणाद्भक्त्युत्पत्तौ प्रतिबन्धकमपि सूचितम्. एवं बाधकद्वयसद्भावेऽपि येनाङ्गेनाश्रयस्य सिद्धिस्तदाहुः दीनस्येति. एवं साधकाभावबाधकसद्भावाभ्यां जातया म्लान्या दीनस्य. दौर्गत्यादेरनोजस्त्वं दैन्यम्. अनोजस एतादृशस्य कृष्ण एवेति पूर्ववत्. एवंप्रकारिकाया ग्लानेरसतां दुरापत्वात् सतां मर्यादिकानां ग्लानौ साधनान्तरेषु प्रवृतेरत्र तु तादृशग्लानिप्रपत्तिभ्यां तदुभयविलक्षणतया ‘‘सोहं तवाङ्घ्री’’त्यत्रोक्तानुग्रहस्य स्वस्मिन्कारणत्वेन सत्ता ज्ञाप्यते. एतादृशस्यापि फलसिद्धिर्गीतायां ‘‘मां हि पार्थ व्यपाश्रित्य’’ ‘‘अपि चेत्सुदाराचार’’इत्यत्र भगवताज्ञप्ता. नव पूर्ववाक्ये पापयोनीनां गतिरुक्ता न तु पापकर्मणाम्, द्वितीये चानन्यभजनेन पापकर्मणां साधुत्वमुक्तं, न त्वाश्रयेणेति नैतद्द्वयमाश्रयेण सिद्धेर्गमकमिति शङ्क्यं, ‘‘सकृदेव प्रपन्नो यस्तवास्मीति च यो वदेत्. अभयं सर्वभूतेभ्यो ददात्येतद्व्रतं ममे’’तिपुराणान्तरीयभगवद्वाक्याच्च भगवतस्तादृशे व्रते निश्चिते ततो भगवदनुग्रहेणैव तत्र प्रवृत्तावपि

माहात्म्यज्ञानपूर्वकस्नेहस्यैव द्वारत्वनिश्चयादनन्यभाक्त्वसिद्ध्या, द्वितीयस्या‘‘नित्यमसुखं लोकमिमं प्राप्य भजस्व मामि’’ति भजनशेषतया निरूपित्वेन प्रथमस्य चाञ्जस्यात्. अतो नात्र कोऽपि चोद्यावसरः ।।९।।

एवं नवभिर्विवैकधैर्याश्रयग्रन्थोक्ताङ्गाभावेप्येतदुक्तरीतिकदैन्येनाप्याश्रयसिद्धिरिति बोधितम्. अतःपरमेतस्याप्यङ्गस्याभावे द्वाभ्यां साधनान्तरमाहुः सर्वसामर्थ्येत्यादि.

सर्वसामर्थ्यसहितः सर्वत्रैवाखिलार्थकृत् ।
शरणस्थसमुद्धारं कृष्णं विज्ञापयाम्यहम् ।।१०।।

‘‘परास्य शक्तिर्विविधैव श्रूयत’’ इत्यादिश्रुतिभिः कर्तुमकर्तुमन्यथाकर्तुं च यावन्ति सामर्थ्यानि तत्सहितस्तदुपपादित‘‘मजामिलादी’’तिपद्येन. ‘‘एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति’’ ‘‘एष ह्येवानन्दयाती’’त्यादिश्रुतिभिः सर्वत्र देशेषु जीवेषु चाखिलार्थानां कृत् ‘‘आकेस्तच्छीलतद्धर्मतत्साधुकारिष्वि’’त्यनेन ताच्छील्ये क्विप् कर्ता. एतादृशं कृष्णमहं जगदुद्धारार्थमाज्ञप्तो वैश्वानर आचार्यवर्यः शरणस्थानां शरणमार्गवर्तिनां समुद्धारं सम्यक् आज्ञप्तमार्गप्राप्यपरमफलपर्यन्तमुद्धारं विज्ञापयामि. सामानाधिकरण्यादध्याहारानाक्रमाच्च प्रथमान्तद्वयमहम्पदस्यैव विशेषणं वा. तथा च तादृशदैन्याभावेपि मयि विश्वासेनैतच्छरणमार्गस्थितौ श्रीमदाचार्यचरणकृपयैवास्माकमुद्धार इति निश्चयदार्ढ्येपि तत्कृतं साधनान्तरमनपेक्ष्य मद्विज्ञापनादेवोद्धरिष्यतीत्यर्थः ।।१०।।

अतः परमेतन्निश्चयदार्ढ्यगमकं वदन्तो विज्ञापनप्रकारं स्वरूपं चाहुः **कृष्णाश्रयमित्यादि**.

कृष्णाश्रयमिदं स्तोत्रं यः पठेत् कृष्णसन्निधौ ।
तस्याश्रयो भवेत् कृष्ण इति श्रीवल्लभोब्रवीत् ।।११।।

कृष्ण आश्रीयतेनेनेति, कृष्ण आश्रयो विषयो यस्येति वा कृष्णाश्रयम्. आश्रयपदस्य विषयवाचकत्वं प्रल्हादचरित्रे ‘‘यत्तत्र गुरुणा प्रोक्तं श्रश्रुवेनुपपाठ च. न साधु मनसा मेने स्वपरासद्ग्रहाश्रयमि’’ति सप्तमेऽन्यत्र च प्रसिद्धम्. एतदन्वर्थनामकमिदमुक्तं स्तोत्रं यः कृष्णसन्निधौ भगवन्निकटे पठेत् तस्य कृष्ण आश्रयः सहायो भवेत्. इतीममर्थं श्रीवल्लभोऽब्रवीदुक्तवानिति. तथाचैवमेतत्पाठ एव पूर्वोक्तनिश्चयदार्ढ्यगमक इत्यर्थः. एवं च विवेकधैर्याश्रयोक्तरीतिकविवेकादेरभावे दैन्यपूर्वकमेवैतत्स्तोत्रार्थानुसन्धानपूर्वकं भगवत्सन्निधावेतत्स्तोत्रपाठः. तत्राप्यनधिकारे श्रीमदाचार्यचरणविश्वासपूर्वकं भगवत्सन्निधौ पाठ इति साधनद्वयं मानसवाचनिक – **केवलवाचनिक – शरणागतिरूपं निर्दिष्टम्** ।।११।।

इद[१]प्राचां रीतिमनुसृत्य व्याख्यातं, मम त्वन्योप्यर्थः स्तोत्रस्य प्रतिभाति.

तथाहि अयं मार्गोऽविहितभक्तिरूपः, अत्र भगवान् रसात्मकः प्रतिपन्नः. एवं सति तदधिकारिष्वेव मन्दमध्यमविचारेणात्र साधनोपदेशो वक्तव्यः. अत एव विवेकधैर्याश्रयसमाप्तौ ‘भक्त्यादिमार्गा’ इत्युक्तम्. अन्यथैकादशे ‘‘योगास्त्रयो मये’’ त्यत्र ‘‘ज्ञानं कर्म च भक्तिश्चे’’ति त्रितयान्ते निवेशिताया भक्तेरादित्वकथनं विरुद्धं स्यात्. अतोऽत्र भक्तिपदेन तत्परामर्शः किं‘‘त्वथैतपरमं गुह्यमि’’ त्यत्रोक्तायाः. तथासति सा भक्तिरादिर्येषां तादृशा ये मार्गा अविहितभक्तेरेव प्रकारभेदा बालादिभावेन भजनरूपास्ते यतो दुःसाध्या इत्यर्थो भवति. एवं सति तत्र तत्रानधिकारे विवेकधैर्याश्रयोक्तरीतिक आश्रयः, अत एव ‘‘स्वाम्यभिप्रायसंशयात्’’ ‘‘गोपभार्यवत्’’ इति स्वामिपदं तदृष्टान्तश्च सङ्गतौ भवतः. अतः परं तत्राप्यनधिकार इदं स्तोत्रपठनमपि तस्यैवानुकल्परूपम्. एतन्मार्गप्रविष्टानामतिजघन्यतमाधिकारिणा मेतन्मार्गफलसम्बन्धो यया प्रणाड्या भवति तामनुसन्धायास्योक्तवत्वात्. तदर्थं स्वस्वरूपं भगवत्स्वरूपं च वक्तव्यम्. तत्र भगवत्स्वरूपं तूक्तमेव. किञ्जाभेदवादानुरोधेन रसस्वरूपविचारे रसालम्बनद्वयाभिन्नरसात्मा स्वयं भवति. उपबृंहितं चेदं ब्रह्मवैवर्तीयश्रीकृष्णजन्मखण्डे गर्गवाक्येषुः‘‘वर्धते सा व्रजे राधा शुक्ले चन्द्रकला यथा. श्रीकृष्णतेजसोर्धेन सा च मूर्तिमती सती’’ ‘‘एका मूर्तिर्द्विधा भूता भेदो वेदे निरूपितः. इयं स्त्री स पुमान् किं वा सा वा कान्ता पुमानयमि’’ति. ‘‘पिताहमस्य जगतो माते’’ति गीतायां च. तथासत्याचार्याणामपि ‘‘वैश्वानराद्वाक्पतेः’’ ‘‘वस्तुतः कृष्ण एवे’’ति च वाक्यद्वयविचारे पूर्वोक्तरीत्योभयमुखारविन्दात्मकत्वमुभयात्मकत्वं च सिद्ध्यति. किञ्च, सप्तश्लोक्यां सर्वोत्तमे च ‘‘श्रीभागवतप्रतिपदे’’त्यादि ‘‘तत्सारभूतरासस्त्रीभावपूरितविग्रह’’इति चोक्तम्. एवं स्वरूपे निश्चिते यदा यद्भावेन यान् प्रति यथा वदन्ति तदा तदधिकारिणः प्रति तानि साधनानीति पुंस्तोत्रमप्येवं व्याख्यायते तदापि न दोषः. तथासत्यस्यार्थस्य गुप्ततया भगवतः परोक्षप्रियत्वेन चात्र परोक्षवादाल्लक्षणाप्यदुष्टैव. ततश्चायमर्थः. तथाहि सर्वमार्गेषु सख्यादिप्रोक्तेषु भगवत्प्राप्त्युपायेषु नष्टेषु तदप्रापकतया स्वान्तःकरणेऽनुपायतया भातेषु. खलोन्तर्दुष्ट ईर्ष्यारूपो धर्मो यस्मिंस्तादृशे कलौ कलहे स्वसमानेषु स्वस्मिन् कृपातिशयख्यातिविषयके नष्टे हृदयादपयाते. चकारेण कलहादेरपि नष्टत्वं ज्ञाप्यते. पाषण्डः कलहजननकारणरूपो धर्मः प्रचुरो यस्मिंस्तादृशे लोके सख्यादौ चादृश्यमाने. विरहेण तेषु दोषारोप‘‘स्तस्याधमस्यान्तिकमि’’त्यादिवत्, अतो न दोषः. एवं सति दुःखितस्य मम कृष्णः सदानन्दस्तादृशतापे हृदि विभाव्यामान एव **गतिर्बहिःप्राप्तौ** साधनरूपो भवत्वित्यध्याहृता प्रार्थना. अत्रैवं

---

१ अतः परं श्रीव्रजराजपादाः प्रमेयमनुसुत्य विवृण्यन्ति स्तोत्रमिदम्.

सर्वसाधनवैफल्यबोधनेन स्वस्यातिखेदः. एवकारेण तादृशसमये ‘‘रुरुदुः सुस्वरं राजन्नि’’त्यत्र फलप्रकरण इव भगवतः प्राकट्यावश्यकत्वं च द्योत्यते. एवमग्रेपि बोध्यम् ।।१ ।।

अतः परं भगवन्मिलनस्थानभूतानां देशानामप्यनुपायत्वमाहुः : म्लेच्छाक्रान्तेत्यादि. म्लाना रसमार्गविरोधिनीच्छा येषां ते म्लेच्छा एतद्रसानभिज्ञास्तैर्देशेषु वृन्दावनादिष्वाक्रान्तेषु. किञ्च, पापैकनिलयेषु.पातीति पः स्थायिभावः सः अपः अक्षरको यत्रासौ पापो विरहः सन्तापातिशयजनकत्वात्, तदेकनलियेषु ‘‘सोयं वसन्तसमयो विपिनं तदेतत् सोयं निकुञ्जविटपी निखिलं तदास्ते. हा हन्त–हन्त नवनीरदकोमलङ्गोनालोकि पुष्पधनुषः प्रथमावतार’’ इतिवत्तदुद्बोधकत्वेन तदेकस्थानेषु. चोवधारणे. तेन पूर्वमतथात्वमनभिज्ञसम्बन्धेन तथात्वमिति ज्ञाप्यते. किञ्च, सतः शरीरस्य या पीडा तया व्यग्रा लोकाः स्वीयैकान्तभक्ता येषु. एतादृशेऽवसरे कृष्ण एवेति पूर्ववत् ।।२ ।।

अतः पर तादृशां तीर्थानामप्यसाधकत्वमाहुः :गङ्गेत्यादि. इह वृन्दावनादिदेशे गङ्गा ‘‘सितासिते सरिते यत्र सङ्गत’’ इति श्रुतौ तस्याः पूर्वं पठितत्वात्सादिर्थस्यः सा गङ्गादिः, यमुनातत्प्रभृतीनि तीर्थवर्याणि घट्टविशेषाश्चन्द्रसरोवरश्रीकुण्डाद्या, ‘नद्यस्तदे’ त्यत्रोक्ता नद्यश्च, तेषु दुष्टैरेतद्भावराहित्येन दुष्टैरेतद्भावराहित्येन दुष्टैरेवावृतेषु व्याप्तेषु. किञ्च, तिरोहिताधिदैवेषु. तिरोहितमगोचरमधि उपरि दैवं ‘‘दैवं दिष्टं भागधेयं भाग्यमि’’ति कोशादस्मद्भाग्यं, ‘‘त्रैलोकलक्ष्म्येकपदं वपुर्दध’’द्यत्र. यदुपरि भगवानिदानीं न दृश्यते चिह्नानि सन्तीति ‘‘श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुम’’ इतिवदधिकतापजनकेष्विति भावः. तथाचैतादृशावस्थायां कृष्ण एवेति पूर्ववत् ।।३ ।।

अतः परं सत्सङ्गस्याप्यसाधकत्वमाहुः :अहमारेत्यादि. निन्दानां सर्वत्र तापाधिक्यमेव बीजं नतु तेषु दोषो बीजम्. अहमारेणास्मद्वशो भगवानस्मत्प्रार्थित एवान्यत्र फलिष्यतीत्येवंरूपेण विमूढेषु स्तब्धेषु. किञ्च, पापानुवर्तिषु पापः पूर्वोक्तरीतिको विरहस्तमनु लक्षीकृत्य वर्तन्त इति तथा. तथाच पूर्वं यद्वश इदानीं तैरपि सह न मिलतीति. तद्गमकं लाभपूजार्थयत्नेषु. लाभो भगवत्प्राप्तिस्तदर्था पूजा लाभपूजा तदर्थं यत्न उद्यमो येषाम्. पूर्वं भगवत्प्राप्तये कात्यायन्यर्चिता पुनरिदानीमपि यत्कुर्वन्ति तेन ज्ञायते न मिलतीति. लीलानां नित्यत्वात्तापेनासक्तिभ्रमवत्तदाविर्भावात्तेष्वप्यमिलननिश्चयः. सत्सु किं तत्सङ्गेनेति कृष्ण एवेति पूर्ववत् ।।४ ।।

अतः परं ततोप्यतितापेन गुरुणां हार्दं विचारयन्तो मन्त्राणामसाधकत्वमाहुः :अपरीति. अः भगवान् तस्य परिज्ञानं स्वभावज्ञानं ‘‘न नन्दसूनु’’रितिप्रस्थानसामयिकविलापस्थश्लोकोक्तं, तेन नष्टेष्वसाधकतया तैर्ज्ञातेषु.

अत एव अव्रतयोगिषु ज्ञानगोचरत्वेपि जपादिनियमायोगिषु. तत्रापि हेतु::तिरोहितार्थदेवेषु तिरोहित: अविषय: अर्थोभिधेयो देवोधिष्ठाता च येषां तादृशेषु मन्त्रेषु व्रतचर्याप्रासङ्गिक – मुख्यमहिषीप्रासाङ्गिक – समर्पणादिप्रासङ्गिकेषु सत्सु. कृष्ण एवेति पूर्ववत् ।।५।।

अत: परं ततोप्यतितापाधिक्येन स्वस्याशक्तिं द्योतयन्त: कर्मादिनाशमाहु::नानेत्यादि. नानाप्रकारका वादा नानावादा:. भगवान् मथुरायामेवं पुरवनितादीनां कामं वर्धयति, जरासुतादिभिर्युध्यति, द्वारकायामुज्जयिन्यां प्राग्ज्योतिषुरे इन्द्रप्रस्थादावेवमेवं करोतीत्यादिलोकोक्तिरूपा:, श्रीमदुद्धवानीत सन्देशादितत्संवादादिरूपा वा, तैर्विनष्टेषु अक्रियमाणेषु सर्वेषु गृहादिकर्मभगवद्व्रतादिषु. किञ्च, पाषण्ड: कापट्यं, तेनैको मुख्य: प्रयत्नो बहिरुद्यमो येषां यत्सम्बन्धी. तथाच तादृशेष्वेतद्रोपनायलोकिकवैदिकविहितमार्यादिक कर्मभगवद्व्रतादीनामुद्यम एव न तु मनस्तत्कृतिरपीति तादृशेषु तेषु सत्सु, ‘‘धारयक्त्यतिकृच्छ्रेण प्राय: प्राणान् कथञ्चने’’त्येतादृशावस्थायां कृष्ण एवेति पूर्ववत् ।।६।।

एवमतिशयिततापे भगवानन्त:प्रादुरभूत्ततस्तयावस्थयाहु::अजामिलादीति. जामि आलस्यं ‘‘जामि वैतद्यज्ञस्य क्रियते यदन्वञ्जौ पुरोडाशावि’’त्यादिश्रुतौ तथासिद्धत्वात् ‘‘आत्मा यावत्प्रपन्नोभूदि’’त्यत्रेवात्र परोक्षवादे वैदिकप्रयोगस्यादोषाच्च. न जामि अजामि अनालस्यं तेन लान्ति गृह्णत इत्यजामिला:, आदिपदेन जामिलाश्च. तद्गुणसंविज्ञान:. शैघ्र्येण विलम्बेन च भगवद्विप्रयोजका इति यावत्. तथाच तादृशा ये दोषा मानादय आज्ञाद्यकरणादयश्च तेषां नाशक:. अनुभवे मानसे साक्षिप्रत्यक्षे च स्थितो गोचरीभवन्. ज्ञापिताखिलमाहात्म्य: ज्ञापितमखिलं समीक्षाभावादि मथुराद्वारकास्थित्यादि तत्तल्लीलादितात्पर्यविषयकं सर्वं माहात्म्यमुत्कर्ष: परोक्षभजनाविस्मरणातिप्रियत्वरूपो येन तादृश:. कृष्ण एवेति पूर्ववत्. एतेन योग्यतमानामप्येतादृशताप एव प्रादुर्भाव ईदृशो न त्वन्यथेति. अन्यथा त्वन्यथेत्यपि सूचितम् ।।७।।

माहात्म्यं यज्ज्ञापितं तन्मध्ये यदत्रोपयुज्यते तत्प्रकटीकुर्वन्त आहु::प्राकृता इत्यादि. प्रकृते रसमार्गे भवा विद्यमाना: प्राकृता:. सकला:, कला भगवदनुरञ्जनचातुर्यं तया सह वर्तमाना:. देवा भगवता सह क्रीडापरा:. किञ्च, बृहदक्षरं गुहायां परमे व्योमन्याविर्भूतं ब्रह्म गणितानन्दकं, गणित: श्रुतौ सङ्ख्यात आनन्दो येषां प्रजापत्यन्तानां यतीनां वा, तेषामेव कं सुखं यस्मादिति तादृशं, न तु स्वस्मिन् स्थितिमात्रेण सकलदेवानां सुखदम्. तथा पूर्णानन्द: कर्मधारयेण बहुव्रीहिणा च हरि: देवानन्दतिरोभावहर्ता कृष्ण एव तस्मान्मम तर्थेत्थर्थ:. तथाचैतन्मार्गीय फलं केवलपरमानुग्रहैकलभ्यमेवेति सपरिकरभगवन्माहात्म्यं यद्भगवज्ज्ञापितं तत्सूचितम् ।।८।।

एवमनुग्रहम् तत्फलस्य स्वकृतसाधनासाध्यत्वेनुसंहिते यावस्था तयाहु::विवेकेत्यादि. विवेक: साधनतारतम्यानुसन्धानं, धैर्यं दु:खसहनसामर्थ्यं, भक्ति: स्वशरीरसेवा. आदिपदेन तत्तत्साधनानि, तै रहितस्य. विशेषतोत्यन्तं पापेन पूर्वोक्तविरहात्मकेन असक्तस्य मुक्तसमस्तसङ्गस्य, अत एव दीनस्य तत एवानोजस: कृष्ण एवेति पूर्ववत् ।।९।।

एवमतितापेन परमदैन्ये भगवान् बहि:प्रादुर्भूतस्तदातिसन्तुष्टा जीवेषु मन्दमध्यमेष्वेवं विलम्बाभावाय विज्ञापयन्ति सर्वेत्यादि. अयोग्येष्वपि योग्यतासम्पादनं कर्तुमकर्तुमन्यथाकर्तुं समर्थस्यैव शक्यमिति तादृश: सन्. तादृशत्वस्य गमकमौदार्यमिति सर्वत्रैवाङ्गीकृतमात्रे अखिलार्थानां पुष्टिपुष्टिमोक्षरूपाणां कृत्! करणशील! कृष्ण! पूर्वोक्तश्रुतिपुराणव्याख्यातरूप! श्रीरघुनाथचरणै: कृष्णपदं सम्बुद्ध्यन्तत्वेन व्याख्यातमित्यस्माभिरपि तथोक्तम्. द्वितीयान्तपक्षेपि क्विबन्तमेव. शरणस्थानामेतन्मार्गरीत्या शरणागतानां फलपर्यन्तमुद्धारं अहं भगवदनुभावप्रकटनार्थाज्ञयावतीर्ण: विज्ञापयामि. एतेन स्वस्य विज्ञापने भगवतश्च तथोद्धार आवश्यकता सूचिता ।।१०।।

विज्ञापनां वदन्ति – कृष्णाश्रयमित्यादि. कृष्णाश्रयं स्तोत्रं श्रीरूप: स्वामिनीभावपूरितत्वात् वल्लभो भागवत: प्रिय आचार्यवर्योब्रवीदिति, य: पठेत् एवमनुसन्दधानो योस्मद्विप्रयोगावस्थां ज्ञापयन् कृष्णसन्निधौ व्यक्तं कथयेत्तस्य कृष्ण आश्रयो भवेदिदं विज्ञापनमित्यर्थ:. स्तोत्रस्य प्रत्यक्षत्वेनेदमा विनाप्यर्थसिद्धेरिति, शब्दान्तरानध्याहाराच्च, अत्र दुरान्वयोप्यदुष्ट एव. ‘‘विमुञ्चात्मतनुं घोरामित्युक्तो विससर्ज ह’’. ‘‘विससर्ज तनुं तां वै ज्योत्स्नां कान्तिमतिं प्रिया’’मित्यादौ भाव एव तनुत्वेन व्यवहाराच्च श्रीरूपत्वोक्तावपि न दोष इति न कोपि शमालेश इति. यथाधिकारं सर्वा एव टीका उपयुज्यन्त इति न क्वापि शमालेश इति. दिक् ।।११।।

इति श्रीवल्लभाचार्यप्रकटीकृतमद्भुतम् ।
स्तोत्रं कृष्णाश्रयकरं विवृतं तत्प्रसादत: ।।१।।

इति श्रीमद्वल्लभाचार्यचरणकमलचञ्चरीकश्रीश्यामलात्मजश्रीव्रजराजविरचितं कृष्णाश्रयस्तोत्रविवरणं समाप्तम् ।